शास्त्री-I

शन्यष्टकवर्ग !—

स्वात् सौरिस्त्रिसुतायारिगः कुजादन्त्यकर्मसहितेषु।
स्वायाष्टकेन्द्रगोऽर्काच्छुक्रात् षष्ठान्त्यलाभेषु॥
त्रिषडायगः शशाङ्कादुदयात् ससुखाद्यकर्मगोऽथ गुरोः।
सुतषड्व्ययायगो ज्ञात् व्ययायरिपुदिङ्नवाष्टस्थः॥

शनिः स्वस्थानात् ३।५।११।६ स्थेषु शुभः, कुजात् ३।५।११।६।१२।१० स्थेषु शुभः। सूर्यात् २।११।८।१।४।७।१० स्थेषु शुभः। शुक्रात् ६।१२।११ स्थेषु शुभः। चन्द्रात ३।६।११ स्थेषु शुभः। लग्नात् ३।६।११।४।१।१० स्थेषु शुभः, जीवात् ५।६।१२।११ स्थेषु शुभः, बुधात् १२।११।६।१०।९।८ स्थेषु शुभः। इति।

भावार्थः— शनि अपने स्थान से ३।५।११।६ स्थानों में शुभ होता है। भौम ३।५।११।६।१२।१० स्थानों में, रवि २।११।८।१।४।७।१० स्थानों में, शुक्र ६।१२।११ स्थानों में, चन्द्रमा ३।६।११ स्थानों में, लग्न ३।६।११।४।१।१० स्थानों में, बृहस्पति ५।६।१२।११ स्थानों में तथा बुध १२।११।६।१०।९।८ स्थानों में स्थित शनि शुभ होता है।

डॉ० सुधीर कुमार
सहा० प्राध्यापक (ज्योतिष)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।

Date 13.08.20
Page 4

(7) कोमला सुस्वरा च कुक्कुटी किं ददाति?

उत्तरम्- लक्ष्मीम्।

(8) गोधामुखं त्रिकोणं च तथा मण्डलवर्धनम्।
स्त्रीपुत्रमतिदं विन्द्यात्कूर्मं शवद्राविवर्धनम्॥
इति कस्य लक्षणम्?

उत्तरम् - कच्छपस्य।

(9) कति दन्ताः छागाः शुभदाः?

उत्तरम्- अष्टदन्ताः।

(10) कति दन्तमुक्ताः छागा गृहे त्याज्याः?

उत्तरम्- सप्तदन्ताः।

(11) किंवर्णकाः छागाः शुभाः भवन्ति?

उत्तरम्- कृष्णाः।

(12) मन्दं सशब्दं चरति श्वेत कृष्णाण्डसंयुतः।
मध्ये कृष्णेन पट्टेन युक्तोः स सोऽपि वृद्धिदः॥
कस्येदं वचनम्?

उत्तरम्- गर्गस्य।

(13) कृष्णमूर्धा नीलपादः प्राग्भागे यश्च पाण्डुरः।
पश्चिमे नीलवर्णः स्यात्सोऽपि भर्तुर्विवृद्धिदः॥
कस्येदं लक्षणम्?

उत्तरम्- छागस्य।

(14) कति छागाः लक्ष्मीसुताः?

उत्तरम्- चत्वारः।

(15) तथा च वर्णैनैकेन स्निग्धवर्णो भवेद्यदि।
स हन्याद्वर्णजान् दोषान् देहः सर्वत्र शस्यते॥
कस्येदं वाक्यम्?

उत्तरम्- पराशरस्य।

डॉ० सुधीर कुमार
सहा प्राचार्य (ज्योतिष)
रा०उ०सं०महावि० सुखसेना, पूर्णियाँ।

शास्त्री-I

Date 13.08.20
Page 2

अष्टवर्ग फल :—

स्थानेष्वेतेषु शुभाः शेषेष्वशुभा भवन्ति चारवशात्।
शुभाशुभविशेषफलं ग्रहाः प्रयच्छन्ति चारगताः॥

ते ग्रहा एतेषु स्थानेषु पूर्वोक्तेषु हिताः शेषेषु अशुभाः। तत्र शुभाऽशुभविशेषमन्तरं कृत्वा यद्विशिष्यते तद्वशात् शुभाऽशुभं वाच्यम्। तदेव ग्रहाः राशौ राशौ चारतः फलं प्रयच्छन्ति। एतदुक्तं भवति। केन्द्रायाषटाद्विनवस्विव्ययेन पाठेन यान्युक्तानि तेषु शोभनं फलं शेषेषु अशोभनम्। यानि शुभस्थानानि गदितानि तानि बिन्दूपलक्षितानि कार्याणि यानि अशुभानि तानि रेखोपलक्षितानि, ततः द्वयानिष्टयोर्विशेषं कृत्वा यदधिकं भवति, तत्फलं ज्ञेयम्। एवमेकत्र मिश्रितानि अष्टौ फलानि भवन्ति। यत्र शुभाऽशुभयोः साम्यं तत्र समत्वं ज्ञेयम्। यत्र बिन्द्वष्टकं जातं तत्र शुभं पूर्णम्। यत्र षड्बिन्दवः तत्र पादोनं फलम्। यत्र बिन्दुचतुष्टयं तत्रार्धम्। यत्र बिन्दुद्वयं तत्र पादफलं ज्ञेयम्। एवमष्टकवर्गेः सर्वेषां विचारः करणीयः।

बिन्दोरधिके शुभदं रेखाऽधिके नैव शोभनं भवति।
विफलं गोचरगणितमष्टकवर्गेण निर्दिष्टम्॥

भावार्थः— पहले बतलाये गये स्थानों में स्थित ग्रह शुभ और शेष स्थानों में ग्रह अशुभ होते हैं। इस प्रकार आठों स्थानों में शुभ और अशुभ को चिह्नित कर जिस स्थान में अशुभ ग्रह अधिक हों उस स्थान में चारवश ग्रह जाते हैं,तो अशुभ फल एवं जिस स्थान में शुभग्रह अधिक हों उस स्थान में चारवश ग्रह जाते हैं, तो शुभफल प्रदान करते हैं।

डॉ० सुधीर कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ०सं० महावि० सुखसेना, पूर्णियाँ।

## वस्तुनिष्ठप्रश्नाः

## शास्त्री-२, ४

Date 13.08.20
Page 3

(१) आपादक्षारकपिला: कृकणपुच्छपार्श्विताश्च ये ।
मार्जारकपिलाक्षाश्च दुर्बला यूथघातिनः ॥
पङ्काविवर्णा: पादान्कुर्वन्तो व्रजन्ति ये ।
अधुर्वहा भवन्त्येते भारहवनि विगर्हिताः ॥
इति कस्योक्तिः ?

उत्तरम्- पराशरस्य ।

(२) शुक्लराजिपरीक्षिते यस्यान्तर्लोचने शुभे ।
मल्लिकाक्षो महाधन्यः स महाकृष्णतारकः ॥
इति कस्य वचनम् ?

उत्तरम्- शालिहोत्रस्य ।

(३) विस्तीर्णवक्षो जघनो गौरे याने च पूजितः ।
स्निग्धपिङ्गेक्षणश्वेतस्ताम्रशृङ्गो महानसः ।
स तु गौः पद्मको नाम गोसहस्रप्रवर्द्धनः ॥
इति कस्य वाक्यम् ?

उत्तरम्- गर्गस्य ।

(४) श्रमः पार्श्वः पञ्च नखा अग्रगो दक्षिणस्तथा ।
चरणस्वस्ताम्रनासो यस्ताम्रोष्ठः सिंहविक्रमः ॥
इति कस्य लक्षणम् ?

उत्तरम्- शुनो लक्षणम् ।

(५) अरक्ताक्षास्ताम्रवक्त्राश्च स्निग्धवर्णाश्च पूजिताः ।
हीनाश्चैव विवर्णाश्च विस्वराश्च विगर्हिताः ॥
कस्येदं लक्षणम् ?

उत्तरम्- कुक्कुटस्य ।

(६) शङ्खदर्भप्रतीकाशशृङ्गाभो रजतप्रभः ।
तथा वैडूर्यवर्णाभो यो भवेदवटसर्पणः ॥
इति कस्य वाक्यम?

उत्तरम्- गर्गस्य ।

P.T.O